संस्कृत-वार्ता:

18.05.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- लोकसभा-निर्वाचनस्य पञ्चमचरणाय प्रचाराभियानम् अद्य अवसीयते।
- प्रधानमन्त्री भाजपादलस्य वरिष्ठ: नेता नरेन्द्र-मोदी अथ च कांग्रेस-दलस्य पूर्वाध्यक्षः -राहुलगान्धी अद्य राजधान्यां नवदिल्ल्यां लोक सभा-निर्वाचनाय-प्रचारम् आरब्धवन्तौ।
- जम्मू-कश्मीरस्य बारामूला-जनपदे अष्टादश सहस्राधिक- कश्मीरी-पंडित- प्रवासिनः मतदातारः निज-मताधिकारस्य प्रयोगं कर्तुं पात्रत्वं सन्धन्ते।
- स्वाति मालिवालेन सह जातस्य कथित-दुर्व्यवहारस्य प्रकरणे मुख्यमन्त्रिणः अरविन्द-केजरीवालस्य निजी-सचिवः बिभवकुमारः दिल्ली आरक्षिबलेन निगडितः।
- भारतेन अद्य किर्गिस्तानस्य बिश्केक-नगरे भारतीय-विद्यार्थिभ्यः गृहेषु एव स्थातुं परामर्शः प्रदत्तः।
- आई.पी.एल.क्रिकेट-स्पर्धा-मालिकायाम् अद्य सायं रॉयल-चैलेन्जर्स-बेंगलुरुदलं चेन्नई सुपर्-किंग्स्-दलं सम्मुखी-करिष्यति।

<u>लोकसभा-निर्वाचन</u>

लोकसभा-निर्वाचनस्य पञ्चमचरणाय प्रचाराभियानम् अद्य अवसीयते। पञ्चम-चरणे उत्तर-प्रदेशस्य चतुर्दश आसनेभ्यः, महाराष्ट्रस्य त्रयोदश आसनेभ्यः, पश्चिम-बङ्गालस्य सप्त आसनेभ्यः , बिहार- ओडिसा-राज्ययोः प्रत्येकं पञ्च आसनेभ्यः, झारखण्डस्य आसनत्रयेभ्यः, जम्मू-कश्मीर-लद्दाखयोः च प्रत्येकं एकैकाय लोकसभासनाय सोमवासरे मतदानं भविष्यति।

<u>दिल्ल्यां प्रचाराभियानम्</u>

प्रधानमन्त्री भाजपादलस्य वरिष्ठो नेता नरेन्द्र-मोदी अथ च कांग्रेस-दलस्य पूर्वाध्यक्षः -राहुलगान्धी अद्य राजधान्यां नवदिल्ल्यां लोकसभा निर्वाचनाय-प्रचारम् आरब्धवन्तौ। प्रधानमन्त्री अद्य हरियाणायाः अम्बालायां सोनीपते च पथ-प्रदर्शनं करिष्यति। पूर्व-केन्द्रीयमन्त्रिणः दिवङ्गतस्य रतनलाल-कटारिया इत्येतस्य भार्या श्रीमती बंटो कटारिया अम्बाला लोकसभासनात् मोहनलाल-बडोली च सोनीपत-लोकसभासनात् भाजपादलस्य प्रत्याशिनौ वर्तेते। अवधेयं यत् दिल्ल्यां हरियाणायां च षष्ठे चरणे मे मासस्य पञ्चविंशे दिने मतदानानि भविष्यन्ति।

## जम्मू-कश्मीरे- निर्वाचन

जम्मू-कश्मीरे पञ्चम-चरण-मतदानेन सह  बारामूला-कुपवाड़ा लोकसभा-निर्वाचन-क्षेत्रे सम्पूर्णदेशे षड्विंशतिः सहस्र-पंजीकृतेषु कश्मीर-पंडित-मतदातृषु अष्टादश सहस्राधिक-प्रवासिनः मतदातारः निज-मताधिकारस्य प्रयोगं कर्तुं पात्रत्वं सन्धन्ते। षड् राज्यानां केन्द्र-शासित-प्रदेश-द्वयस्य च  नवचत्वारिंशत् लोकसभासनेषु सोमवासरे मतदानं भविष्यति। निर्वाचन अधिकारिभि: प्रवासीजनेभ्य: ऊनत्रिंशत् मतदानानि केन्द्राणि विनिर्मितानि सन्ति। येषु उधमपुरे  एकं जम्मूनगरे चतुर्विंशतिः, नवदिल्ल्यां चत्वारि मतदानकेन्द्राणि सन्ति। एतदतिरिच्य कश्मीरी प्रवासी मतदातृभ्य: प्रात: षड्वादनात् आरभ्य सायं षड्वादनं यावत् यातायात सौविध्यं अपि उपलब्धो भविष्यति।

## दिल्ली-पुलिस विभव

राज्यसभाया:  सदस्यया स्वाति मालिवालेन सह जातस्य कथित-दुर्व्यवहारस्य प्रकरणे मुख्यमन्त्रिणः अरविन्द-केजरीवालस्य निजी-सचिवः बिभवकुमारः दिल्ली आरक्षिबलेन निगडितः। अस्मिन् प्रकरणे पूर्वमेव प्राथमिकी पञ्जीकृता आसीत्। विभवकुमार: अद्य दिल्लीस्थे सिविल लाइंस आरक्षि-स्थात्रे नीतः। प्रत्युत्तरे बिभव-कुमारेण अपि स्वाति- मालीवालं विरुध्य प्राथमिकी पञ्जीकृता।

## किर्गिस्तानस्य बिश्केक

भारतेन अद्य किर्गिस्तानस्य बिश्केक-नगरे भारतीय-विद्यार्थिभ्यः गृहेषु एव स्थातुं परामर्शः प्रदत्तः। विदेशी विद्यार्थिनः आलक्ष्य हिंसायाः प्रतिवेदनानन्तरम् अयं परामर्शः प्रसारितः। बिश्केक इत्यत्र भारतीय-विद्यार्थिनां सुरक्षां सुनेश्चीय विदेश-मन्त्री सुब्रह्मण्यम जयशङ्करः अवोचत् यत् स्थितेः निरीक्षणं विधीयते। सम्प्रति तत्रत्य-स्थितिः नियन्त्रणे वर्तते। श्री जयशङ्करेण विद्यार्थिनः दूतावासेन सह सम्पर्क-स्थातुं परामृष्टाः। किर्गिस्ताने भारतीय-दूतावासेन विद्यार्थिभ्यः आपत्कालिक-दूरभाष-सङ्केतः शून्यं पञ्च पञ्च - पञ्च  सप्त एकम् - शून्यं  शून्यं चत्वारि एकम् इति प्रख्यापितः। किर्गिस्तानस्य बिश्केक-स्थले विगतेभ्यः कतिपय-दिनेभ्यः हिंस्र-घटनाः जायन्ते। यासु पाकिस्तानस्य पञ्चविद्यार्थिनः मृत्युमुपगताः।

## श्रीलंकायां सीता एलिया

श्रीलंकायां सीता एलिया अर्थात् अशोक वाटिकायां सीता अम्मन मंदिरे कुंभाभिषेकम् इति पर्वणः सज्जा सजवं विधीयते। अयम् अभिषेकः रविवासरे भविष्यति। अद्य प्रातः कोलम्बो नगरस्य मयूरपति श्री भद्रकाली अम्मां कोविल इति स्थलात्  एका रथयात्रा प्रस्थिता। इयं रथयात्रा अशोक वाटिकायां सीता मन्दिरं यावत् गच्छति। श्रीलंकायाः वरिष्ठ- नेतृभिः सहैव राम-लला-मंदिर- विश्वहिंदू परिषत्-विश्व-रामायण-सम्मेलनस्य च प्रतिनिधीनाम् उपस्थितौ रथयात्रा प्रयाता। अत्रावसरे भारत- नेपालयोः नैकेभ्यः क्षेत्रेभ्यः श्रद्धालवः कोलम्बो नगरं यान्ति। एतद् अतिरिच्य अभिषेक-समारोहाय अयोध्यायाः सरयू-जलस्य पञ्च  कलशाः समानीताः।

विदेशसचिवः विनयक्वात्रा

विदेशसचिवः विनयक्वात्रा विदेश-राष्ट्रमण्डल-विकास-कार्यालये ब्रिटेनस्य स्थायी उपमन्त्रिणः सर-फिलिप-बार्टन-इत्यनेन सह मेलनम् अकरोत्। गुरुवासरे शुक्रवासरे च श्रीक्वात्रा ब्रिटेनस्य द्वि-दिवसीय-यात्रारतः अवर्तत्। उभाभ्यां पक्षाभ्यां द्विपक्षीय-सम्बन्धानां परस्पर-हितसम्बद्ध क्षेत्रीयवैश्विक-प्रकरणेषु चर्चा कृता। अत्रावसरे तैः त्रिंशदुत्तर-द्वि-सहस्र-वर्षं यावत् कार्ययोजना अपि समीक्षिता। पक्षद्वयेन व्यापारार्थिक-रक्षा-सुरक्षा-विज्ञान-प्रौद्योगिकी-जलवायु-परिवर्तन-क्षेत्रेषु द्विपक्षीय-सहयोग-संवर्धने चर्चा कृता। विदेश-कार्यालय-परामर्शस्य आगामिनम् उपवेशनम् अग्रिमे वर्षे नवदिल्ल्याम् आयोजयिष्यते।

भारत-यूएई

भारतस्य एकेन उच्चस्तरीय प्रतिनिधिमण्डलेन महत्वाकांक्षी-भारत-मध्य-पूर्व यूरोपस्य आर्थिक समवायं विकसितुं आबूधाबी नगरे संयुक्त-अरब-अमीरातस्य अधिकारिभि: सह प्रथमचरणीया वार्ता विहिता। उभौ देशौ इमां परियोजनामालक्ष्य मासपूर्व सन्धिपत्रत्रयो हस्ताक्षराणि कृतवन्तौ।

ऋतु संचेतना

ऋतु-विज्ञान-विभागेन आगामिषु दिवसेषु राजस्थान-पञ्जाब-हरियाणा- दिल्ली चेति राज्येषु कतिपय-क्षेत्रेषु प्रबल आतप-स्थितेः अनुमानः प्रकटितः। सममेव विभागेन उक्तं यत् देशस्य पूर्व-मध्यभागेषु अपि अद्यारभ्य एतादृशैव स्थितिः संभाव्यते। ऋतु-विज्ञान-विभागेन अनुमानितं यत् अस्य मासस्य त्रयोविंशति: दिनांकं यावत् देशस्य दक्षिण-भागेषु कुत्रचित् तीव्र-वर्षायाः सम्भावना विद्यते। अपि च ऋतु-विज्ञान-विभागेन मंगलवासरं यावत् तमिलनाडु-पुद्दुचेरी-कराईकल-केरल-माहे-तटीयान्ध्रप्रदेश-रायल-सीमा-कर्नाटके चेति केषुचित् स्थलेषु प्रबलवृष्टेः सम्भावना प्रकटिता। अपरत्र पूर्वोत्तर-भारतस्य अरुणाचल-सिक्किम-असम-नागालैण्ड-मणिपुर-मेघालय-राज्येषु सोमवासरं यावत् कतिपय स्थलेषु प्रबल वृष्टे: संभावना प्रकटिता अस्ति।

बैडमिण्टन

बैंकाक नगरे प्रवर्तमानायां थाइलैंड ओपन बैडमिण्टन इति स्पर्धायाम् अद्य पुरुषयुगलवर्गे उपान्त्यचक्रे चिरागशेट्टी सात्विकसांईराज रंकी रेड्डी च कोरियायाः मिंग चे लू तांग काई वेई इत्यनयोःयुगलं सम्मुखी करिष्यतः ।

महिलायुगलवर्गे उपान्त्यचक्रे अद्य अश्विनी पोनप्पा तनीशा क्रास्टो इत्यनयोः युगलं थाइलैंडस्य जोंगकोलफान किटीथराकुल रविंडा प्राजोंगजई इत्यनयोः युगलं सम्मुखी करिष्यतः।

## आई.पी.एल.क्रिकेट

आई.पी.एल.क्रिकेट-स्पर्धा-मालिकायाम् अद्य रॉयल-चैलेन्जर्स-बेंगलुरुदलं चेन्नई सुपर्-किंग्स्-दलं सम्मुखी-करिष्यति। एषा स्पर्धा सायं सार्ध-सप्तवादनात् आरप्स्यते। गतरात्रौ क्रीडितायां स्पर्धायां लखनऊ-सुपर्-जॉइंट्स्-दलेन मुम्बई-इण्डियंस्-दलम् अष्टादश-धावनाङ्कैः पराजितम्।

।। इति वार्ता: ।।